National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 30-32
© 2026 NJHSR
www.sanskritarticle.com

**सन्तोष मण्डलः**
सहायाकाध्यापकः,
यतीन्द्र राजेन्द्र महाविद्यालयः,
मुर्शिदावाद, पश्चिमवङ्गः

**Correspondence:**
**सन्तोष मण्डलः**
सहायाकाध्यापकः,
यतीन्द्र राजेन्द्र महाविद्यालयः,
मुर्शिदावाद, पश्चिमवङ्गः

# प्राचीनभारते परिवेशभारसाम्यार्थभूमिसंरक्षणं – कौटिलीयेऽर्थशास्त्रे

**सन्तोष मण्डलः**

**शोधसारः –** वर्तमाने परिवेशः विषाक्तः, जीवनं दुर्विषहं विदधाति। नास्ति अत्र निर्मलः वायुः नास्ति वा सुपेयं जलम्। परन्तु पुरा सप्तद्वीपे भारतभूखण्डे आर्य्योपनिवेशस्थापनकालादेव प्रकृत्या सह आर्य्यकुलोद्भवा नामेकात्मता परिलक्ष्यते। पञ्चनदमातृकस्य भारतस्य शस्यश्यामलायां समतलभूमौ आर्य्यैर्वसतिस्थापनं कृतम्। जनसंख्यायाः क्रमवृद्धेः कारणात् वसोपयोग्यायाः तथा कर्षणयोग्यायाः भूमेः प्रयोजनमपि क्रमवर्द्धमानमासीत्। आर्य्यप्रवर्त्तितवैदिकसाहित्यस्य परवर्त्ती विकाशः धर्मशास्त्रेषु परिलक्ष्यते। कौटिल्यकृतम् अर्थशास्त्रमेकं धर्मशास्त्रमपि च नीतिशास्त्रम्। इदं नीतिशास्त्रं राज्यस्य रक्षणं तथा पालनधिकृत्य विरचितम्। कौटिल्यमते समाजस्य रक्षार्थं राज्यजयः अर्थात् आप्तभूमेः प्राप्तिः प्राप्तभूमेश्च संरक्षणमिति राज्ञः धर्म एव।

**प्रमुखशब्दाः –** कौटिल्यः, अर्थशास्त्रम्, भूमिः, परिवेशसंरक्षणम्, जनपदम्।

पुरा सप्तद्वीपे भारतभूखण्डे आर्य्योपनिवेशस्थापनकालादेव प्रकृत्या सह आर्य्यकुलोद्भवा नामेकात्मता परिलक्ष्यते। पञ्चनदमातृकस्य भारतस्य शस्यश्यामलायां समतलभूमौ आर्य्यैर्वसतिस्थापनं कृतम्। अतः प्रकृत्याः विचित्रानि रूपानि तैः प्रत्यक्षीकृतानि षभृतवस्तासां वैशिष्ट्यानि सह आर्य्याणमृषीणां समीपं समुपगता इव। प्राचीनतमसाहित्ये आर्य्या ऋषयः वैदिकसूक्तेषु प्रकृत्याः अपूर्वं नवनवोद्भासितं रूपं प्रत्यक्षी कुर्वन्तः तस्य माहात्यं पर्य्यकीर्त्तयन्। अग्निः सूर्य्यानिलौ वरुणः पृथिवी द्यौः ऊषा सरस्वती नेदीनाम्य इत्यादिषु प्राकृतिकशक्तिषु तैः देवत्वं समारोपितम्। प्रत्यक्षीकृता च तैः मुनिभिः प्रकृत्याः ऐशी क्षमता। तस्याः अनुशासने स्थितामासां भयालं रूपञ्च तैः परिदृष्टम्।

शनैः शनैः कालवशेन मानवसमाजस्य सृष्टिरभूत्। अनुकूला इयं प्रकृतिः अस्माकं मातृसमा इति वौधश्च मानवचेतसि अजनि। क्रमेण पशुचारण-भूमिकर्षण-वनसृजनानि इत्यादिषु कर्मसु भूमिव्यवहारः प्रवर्त्तितोऽभूत्। ऋषीनाम् तपस्यार्थं तपोवनस्य च सृष्टिरभवत्। तत्राश्रमस्य शान्तिमये परिवेशे वेदविदः मुनयः शिष्याणामध्यापनाकर्मसु स्वान् नियोजयामासुः। मृगादयः गृहपालिताः पशवः तत्राश्रयं लव्धा निर्भयमविचरन्। वृक्षलतासमाकुले तत्राश्रमे प्रदोषे नीड़प्रत्यागतानां विहगानां कूजितैः सह शिष्याणां सामगीतिः सम्मिलिता सती ऐक्यताने पर्य्यवसिता इव।

अनन्तरं जनसंख्यायाः क्रमवृद्धेः कारणात् वसोपयोग्यायाः तथा कर्षणयोग्यायाः भूमेः प्रयोजनमपि क्रमवर्द्धमानमासीत्। आर्य्यप्रवर्त्तितवैदिकसाहित्यस्य परवर्त्ती विकाशः धर्मशास्त्रेषु परिलक्ष्यते। भारतीयसंस्कृतौधर्मशास्त्रप्रवाहः द्विधा विभक्तः धर्मशास्त्रधारा अर्थशास्त्रधारा चेति। उभौ प्रवाहौ एव वेदमूलौ – **"वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्"**[1] इत्याद्युक्तेः। उक्तञ्च –

**धारणाद्धर्म इत्याहुः धर्मो धारयते प्रजाः।**
**यत् स्याद्धारणसंयुक्तं स धर्म इति निश्चयः॥**[2] इति।

पुरुषार्थशव्दस्य धर्मार्थयोः अन्तर्भावित्वं गण्यते। पुरुषैरर्थ्यते याच्यते योऽसौ इति पुरुषार्थशव्दस्य व्युत्पत्तिः। मानवाः स्वजीवनोपयोगितया येषामर्थानां प्रयोजनमनुभवन्ति तेऽर्थाः पुरुषार्थशव्देन व्यवह्रियन्ते। भारतीयसंस्कृतौ धर्मार्थकाममोक्षाः इति पुरुषार्थस्य चत्वारः भेदाः स्वीकृताः धर्मशास्त्रे प्रथमतो द्वयोः धर्मार्थयोः प्राधान्यं परिगणितम्। पश्चात् काममोक्षयो पुरुषार्थे अन्तर्भावः। याज्ञवल्क्य-

मनुप्रभृतयः वेदं धर्ममूलं मन्यन्तो सामाजिकजीवनयात्रानिर्वाहाय अर्थस्य प्रयोजनं प्रधानीभूतं विना अर्थं कस्यचनापि कार्यस्य सिद्धिर्न भवति। पुनस्तु मानवजीवनस्य प्रधानः अर्थः पुरुषार्थः धर्म इति। समाजस्य धारणं पोषणं वा धर्मेनैव सिध्यति। अतः उक्तं धारणाद्धर्म इति।

अर्थशास्त्रधारायां वहुनि अर्थशास्त्रानि सन्ति। तथापि महामतेः कौटिल्यकृतस्य आविष्कारात् परमर्थशस्त्रगतायां चिन्ताधारायां परिवर्तनं परिलक्षितम्। पृथिव्या लाभे पालने च यावन्त्यर्थशास्त्रानि पूर्वाचार्य्यैः प्रस्थापितानि प्रयशस्तानि संहृत्यैकमिदम् अर्थशास्त्रं कृतक्षिति कौटिल्योक्तेः ज्ञायते यत्तस्य समये वहुनि अर्थशास्त्रानि प्रचलितानि आसन्। 321 खृष्टपूर्वाव्दे मौर्यचन्द्रगुप्तस्य सिंहासनारोहणात् परं तस्य राजत्वकाले कौटिल्येन अर्थशास्त्रं प्रणीतम्। उक्तञ्च – कौटिल्येन नरेन्द्रार्थे शासनस्य विधिः कृतः इति। कौटिल्यकृतम् अर्थशास्त्रं राज्यस्य रक्षणं तथा पालनधिकृत्य विरचितम्। कौटिल्यमते समाजस्य रक्षार्थं राज्यजयः अर्थात् आप्तभूमेः प्राप्तिः प्राप्तभूमेश्च संरक्षणमिति राज्ञः धर्म एव।

पुरा भूमिः एव आसीत् विनिमयस्य माध्यमम्। कौटिल्यमते मनुष्यवतीभूमिरर्थ – मनुष्याणां वृत्तिरर्थः। मनुष्यवतीभूमिरित्यर्थः। तस्याः पृथिव्याः लाभपालनोपायः शास्त्रम् अर्थशास्त्रम्। धर्मशास्त्रेषु तत्कालीनं धर्मीयम् आचारानुष्ठानादिकं यथा उपलभ्यते तथा प्राचीननाम् ऋषीणां परिवेशचिन्तनमपि परिलक्ष्यतो विद्यन्ते। अत्र प्राणिनां जीवनधारणाय समुपयुक्तं परिवेशगठनार्थं वहवः उपदेशाः। अर्थशास्त्रे महामतिकौटिल्येन यद्भूमेः प्राधान्यम् उक्तं तस्य यथायथव्यवहार एव भूमिसंरक्षणम् इत्युच्यते। जीवजीवने मानवानां तथा अरण्यचारिणां प्राणिनाम् आश्रमवासिनः ऋषिकुलस्य च सुपेयस्य जलस्य प्रयोजनम् इत्यपि सर्वैः एव स्वीकृतम्। अतः वृक्षरोपणं वनसृजनं जलाशयनिर्माणं कूपखननाम् इत्यादिकार्य्यर्थं भूमेः प्रयोजनम्। ईदृशेषु कार्येषु भूमेः अभावे परिवेशरक्षणं सम्यग् न भवति इत्यतः पृथक् सुनिर्दिष्टायाः भूमेः रक्षणम् अवश्यमेव राज्ञा कर्त्तव्यम्। अनेन सर्वेन परिवेशस्यपि सुरक्षा जायतो।

अर्थशास्त्रवेत्ता कौटिल्यः अपरापराणां धर्मशास्त्रकृतां मतं समर्थयन् स्वकृतस्य ग्रन्थस्य द्वितीयाधिकरणे जनपदनिवेशम् अर्थात् भूमिसंक्रान्तविषयम् आलोचयामास। अध्यक्षप्रचार नाम्नि अस्मिन् अधिकरणे जनपदस्थापनं दुर्गनिर्माणं पशुचारणक्षेत्रम् अरण्यम् इत्यादौ भूमिविषये स्वमतम् उपन्यस्तम् आचार्य्यकौटिल्येन। अस्मिन् एव अधिकरणे भूमिच्छिद्रविधानं नाम प्रकरणे कर्षणायोग्यायाः भूमेः व्यवहारः निर्देशितः ग्रन्थकृता। उक्तञ्च –

**"अकृष्यां भूमौ पशुभ्यो विवीतानि प्रयच्छेत्"**[3] इति।

नवनवजनपदनिवेशकाले परदेशात् स्वदेशाद्वा यत्र यत्र जनवाहुल्यम् अस्ति तत्रस्थानम् आनयनं नृपतेः कर्त्तव्यम्। ग्रामनिवेशकाले शूद्रजातीयानां प्राधान्यं राज्ञा देयं मतः एतेषाम् अन्नोत्पादनस्य प्राधान्यम्। अतः शूद्रा एव प्रधानतः ग्रामवासनः भवन्ति। ग्रामनिवेशवर्णनाकाले अतिविचक्षणेन कौटिल्येन ग्रामस्य गृहसंख्या अपि निर्द्धारिता। ईदृशेषु शूद्रप्रधानेषु ग्रामेषु परिवेशगतभारसाम्य-रक्षणार्थन्यूनं शतगृहम् अनूर्द्धं पञ्चशतगृहं वा अवश्यमेव भवितव्यम्। ग्रामाद् ग्रामान्तरस्य सीमा एकक्रोशं क्रोशद्वयं वा भवितुम् अर्हति इत्यपि शास्त्रकृता कौटिल्येन उक्तम्। इत्थं सीमानिर्द्धारणस्य कारणम् – आपत्काले ग्रामवासिनां परस्पराणां रक्षणकार्य्ये साहाय्याय। ग्रामसीमानिर्द्धारणकाले नदी पर्वतः अरण्य गृष्टिरिति नाम ओषधिवृक्षः गर्त्तम् आवद्धजलाशयः सेतुवन्धः शाल्मलीतरुः शमीवृक्षः इत्यादिभिः सीमानिर्द्धारणं कर्त्तव्यम्। प्राचीनभारते क्षुद्रतमजनपदाश्शः ग्राम एव आसीत्। ईदृशानां ग्रामाणां रक्षार्थं तेषां प्रवेशमुखे तथा निर्गमनद्वारे राज्ञा अन्तःपालदुर्गं स्थापयित्वा अन्तःपालनियोगः कर्त्तव्यः। अन्तः पालदुर्गस्य वहिर्देशः व्याध-शवर-पुलिन्द-चण्डालैः तथा अन्यान्यवनेचरजातिभिः रक्षणीयम्। जनपदनिवेशकाले ऋत्विगाचार्य-पुरोहित-वेदाध्यायिनां व्राह्मणानां निमित्तं वंशपरम्पराभोग्यं व्रह्मदेयं नाम भूमिदानं राज्ञा कर्त्तव्यम्। अनन्तरम् अध्यक्षसंख्यायनीकस्थ चिकित्सकाश्वपाल-जङ्घा-करिकेभ्यः अपि भूमिदानं नृपतिना विधेयम्। राजप्रदत्ता भूमिस्तु एकपुरुषभोग्या। कर्षणायोग्याः याः याः भूमयः यैः यैः कृषकैः कर्षणयोग्याः कृताः ताः तेभ्यः कृषकेभ्यः राजा निःशर्तम् अदात्। कृषकैः भूमिषु अकृष्टासु ताः अन्येभ्यः राजा दद्यात् इत्येव कौटिल्यविधानम्। इत्थं विहितेन भूमिविभागेन परिवेशरक्षणम् अपि भवितव्यम्। कृषिकार्य्योपकाराय नृपतिः प्रत्यर्पणयोग्यानि वीज-पशु-हिरण्यानि कर्षकान् दद्यात्। आकरकर्माण्ड-द्रव्यवन-हस्तिवन-व्रह्मप्रचारेत्यादिकं वाणिज्याय राजपथनिर्माणं प्रशस्तजलपथविधां क्रयविक्रयोपयोगिहट्टशाला निर्माणं तथा आपणादिनिर्माणम् अपि राज्ञः कर्त्तव्यानि। भूमेः ईदृग्व्यवहारेण राज्यस्य सम्यक् उन्नतिः साध्यते। शस्योत्पादनाय जलस्य प्रयोजनम् अपि न उपेक्षणीयम्। अतः समीपस्थनदीतः खालखननेन सेचार्थजलानयनम् अपि राज्ञा विधेयम्। जलाशय-निर्माणकाले जलराशेः प्रवेश निर्गमनयोग्य-नालिकानिर्माणाय उपयोगिन्याः भूमेः प्रदानेन नृपतिना परिवेशस्य सुष्ठुरक्षणं विधातव्यम्।

एवं कर्षणयोग्यायाः भूमेः यथायथम् उपयोगविधिं निर्णयताचार्य्येण कौटिल्येन अर्थशास्त्रस्य भूमिच्छिद्रप्रकरणे कर्षणायोग्यभूमेः व्यवहारः उक्तः। उक्तञ्च तेन – प्रदिष्टाभय-स्थावर-जङ्गमानि च व्राह्मणेभ्यो व्रह्म-सोमारण्याणि, तपोवनानि च तपस्विभ्यो गोरुत-पराणि प्रयच्छेत्[4] इति। कर्षणायोग्यभूमिः गोचारणक्षेत्ररूपेण परिगण्यते। अस्य अकृष्यायां भूमौ चतुः क्रोशपरिमितं स्थानं वेदाध्ययनोपयोगिने व्रह्मारण्याय तथा सोमारण्यार्थं नृपतिः दानं कुर्य्यात्। तत्तत् स्थानं वहुप्रकारैः तरुलतादिभिः समन्वितम् अभयारण्यरूपेण परिगण्यते। इदम्

अभयारण्यं तु मृगादीनां निर्भयं विचारणक्षेत्रम्। अनेन पशूणां प्रत्यपि राज्ञां कर्त्तव्यं विहितं भवति तथा च हिंस्राणां श्वापदानामारोण्वेषणाय सम्भाव्यजनपदगमनापि निर्वार्याता सर्वतः परिवेशगतं भारसाम्यरक्षणमेव महामतेः कौटिल्यस्य प्रचेष्टा आसीत्। अकृष्यायां भूमौ राज्ञः स्वविहाराय एकद्वारस्य मृगवनस्य सृजन-प्रयोजनम् अपि अनुभूतं कौटिल्येन। अनेकपुष्पफलसमण्वितोभिः वृक्षराजिभिः सुशोभितेन अनेन मृगवनेन परिखावेष्टितं भवितव्यम्। इदम् उपवनं कण्टकद्रूमशून्यं तथा तृषातुराणां मृगानां जलपानाय नातिगभीरजलाशयोपेतं भवेत्। जनपदसीमान्ते अन्यत्र वा उपयुक्तभूमौ अपि नृपतिः मृगवनं प्रतिष्ठातुम् अर्हति। एतादृशं मृगवनं सर्वेषाम् उपद्रूतानां मृगाणाम् आश्रयस्थलं भवति एतान् सर्वान् विहाय तपस्विनां तपोवनचरनार्थम् अकृष्यभूमिदानम् अपि नृपस्य कर्म एव। अतःपरं स्वीयजनपदप्रान्ते आटविकरक्षितं हस्तिवननिर्माणम् अपि राज्ञः करणीयम्। हस्तिवनाध्यक्षः नागवनपालैः सह पर्वते नदीतटे सरोवरे कच्छे वा नागवनं रक्षेत्। नागवनपालाः हस्तियातिनं शवरं हन्तुम् अर्हन्ति।

एतानि व्यतिरिच्य राज्ञः दुर्गनिर्माणाय भूमेः प्रयोजनम् अनुभूय कौटिल्येन तदुपयोगिस्थानस्य रक्षणविषये स्वमतम् उपन्यस्तम्। तेन दुर्गाणां चातुर्विध्यं स्वीकृतम् – उदकम्, धान्वनम्, पार्वतम्, वनदुर्गञ्चेति। राज्यस्य सम्यक् पालनरक्षणाय एतेषां दुर्गाणां निर्माणार्थं नृपतिना भूमिसंरक्षणं कर्त्तव्यम्।

इत्थम् अर्थशास्त्रे कौटिल्येन कृष्याकृष्यभूमेः यद्व्यवहारः निर्णीतः तत्तु वर्तमानकालेऽपि समादृतः। परिवेशरक्षणाय सेचार्थञ्च कौटिल्योपदिष्टा जलसंरक्षणविधिः अद्यापि प्रशस्यते। वृटिशशासिते भारते ऊनविंशशतके वर्गि-नामकमाराठादस्युभ्यः परित्राणाय तदानीन्तनराजधान्यां कलिकातमहानगर्य्यां मारहट्टाडिच् इत्यभिधेयं प्रसिद्धं खालं खनितं वृटिशशासकैः। पुनः च आसीत् तत्रैव नगर्य्यां वागजोला इत्यभिधेयत्मपरं खालम्। इदं खालद्वितयं नाव्यमसीत्। गङ्गाप्रवाहेन सह एनयोः संयोगश्च संरक्षितौ। अतः तस्मिन् काले वाणिज्यस्य उन्नतिः अपि एतेभ्यां साधिता।

एतद्विहाय अपराणि अपि खालानि नगरस्य जलनिष्काशन-माधानि अभवन्। इत्थं नगरस्य परिच्छन्नता विधानेन परिवेशरक्षणम् अपि साधितम्। जनवहुलतया वर्ज्यनिक्षेपेन यथोपयुक्तसंरक्षणाभावात् च एतानि खालानि लुप्तप्रायानि।

इदानीं तु स्वाधीनभारतेकौटिल्यमनुप्रभृतीनां समाजतत्त्वविदाम् उपदेशम् अनुसृत्य केन्द्रीय शासकवर्गैः वहवः नदीवनन्धरूपाः जलाशयाः सृष्टाः। एभ्यः जलाशयेभ्यः खालखननेन जलराशयः सेचार्थं शस्यक्षेत्रेषु आनीताः। जलं व्यतिरिच्य अन्नोत् पादनम् असम्भवः। उक्तञ्च - पर्जन्यादन्नसम्भवः इति। नदीवन्धेषु वृष्टेः जलराशि सञ्चिता भवति। पञ्चनदविधौते पाञ्जावे शतद्रूविपाशयोः नद्योः संयुक्ति करणेन रोपार इति नाम नदीवन्धरूपः विशालः जलाशयः सृष्टः। इदं स्थानम् आनन्दपुरसाहेव नाम्नः प्रसिद्धस्य गुरुद्वारस्य समीपस्थ। अस्मात् नदीवन्धत् खनितखालेन जलप्रवाहेन भारतस्य पश्चिमांशः शस्य-श्यामलः सञ्जातः। पुनश्च राजधान्यां दिल्लीनगर्य्याम् अपि दैनन्दिनव्यवहार्य्यं जलं खालखननेन जलस्य सम्यग् व्यवहारः कृषेः तथा परिवेशस्य उन्नतिसाधकः अभूत्। आचार्य्यकौटिल्योपदिष्टं वन्यपशुनां रक्षाणार्थमतयारण्यानि अपि सृष्टानि। तत्र पशवः सुखेन तथा निर्भयं विचरन्ति। विचित्राणां तथा दुर्लभाणां पक्षिणां रक्षणाय वहुत्र विहगालयाः अपि सृष्टाः। एतेषां विहगा लघाणां तथा अभयारण्याणाम् अवस्थानानि प्रायशः नदीतटे विहितानि। पश्चिमवङ्गे सुन्दरवनस्थ पाखिरालयः नाम विहङ्गमाश्रयः सम्यक् ख्यातः।

भारते वैदिकयुगतः भूमिरेव उत्पादनस्य प्रधानं साधनम् अभूत्। कौटिल्यनिर्देशितेन भूमेयथायोग्यव्यवहारेण अद्यापि परिवेशसंरक्षणं सहजासाध्यं भवति इत्येत्तु विस्मयकरं तथा प्रशंसार्हम्।

आसीद् अर्थशास्त्रकारः समाजतत्त्ववेत्ता। अतः मानवानां तथा वन्यप्राणिनां संरक्षणाय सर्वकालोपकारकः भूविभागः तत्त्वदर्शिना कौटिल्येन कृतः। अर्थशास्त्रकृत् कौटिल्यः सदा राज्यस्य कुशलचिन्तायां निरतः आसीत्। अतः तेनैव ब्राह्मणेन कृष्याकृष्यभूमिसंरक्षणाय ईदृशनिर्देशदानं सम्भवम्। नमामि तस्य आचार्य्यस्य चरणकमलेषु।

**विस्तृतसन्दर्भसूची –**


- वन्द्योपाध्यायः, डः मानवेन्दुः। (2014)। कौटिलीयम् अर्थशास्त्रम् (प्रथमखण्डः)। कलकाता, संस्कृत-पुस्तक-भाण्डारः।
- वन्द्योपाध्यायः, डः मानवेन्दुः। (2014)। कौटिलीयम् अर्थशास्त्रम् (द्वितीयखण्डः)। कलकाता, संस्कृत-पुस्तक-भाण्डारः।
- वन्द्योपाध्यायः, डः मानवेन्दुः। (2016)। मनुसंहिता। कलकाता, संस्कृत-पुस्तक-भाण्डारः।
- पाहाड़ी,डःअन्नदाशङ्करः।(2012)। मनुसंहिता (द्वितीयोऽध्यायः)। कलकाता, संस्कृत-वुक-डिपो।
- साहा, डः विश्वरूप। (2009)। धर्मार्थशास्त्रपरिचयः। कलकाता, सदेशः।
- मिश्रः,प्रो. जयकृष्णः।(2014)। धर्मशास्त्रस्येतिहासः (प्रथमभागः)। वाराणसी, चौखम्बा संस्कृत सीरीज आफिस।
- भादुड़ी, नृसिंहप्रसादः। (2010)। दण्डनीति। कलकाता, साहित्य संसदः।


**पादटीका –**

[1] मनुसंहिता – 2/6

[2] महाभारतम्, कर्णपर्व

[3] कौटिलीयम् अर्थशास्त्रम् – 2/2/1

[4] कौटिलीयम् अर्थशास्त्रम् – 2/2/1